
डॉ० रविशंकर पाण्डेय

आॅनलाइनसंस्कृतप्रशिक्षणकेन्द्रद्वारा प्रस्तावितः

# षाण्मासिकः संस्कृतसम्भाषणप्रशिक्षणपाठ्यक्रमः

## (सर्टिफिकेट कोर्स)

## संपूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी



* समन्वयकः *

डॉ. रविशंकर पाण्डेयः

सह - समन्वयकः

1. डॉ. राजा पाठकः
2. डॉ. मधुसूदन मिश्रः

# उद्देश्यम्

प्राचीनकाले संस्कृतभाषा, जनभाषा राजकीयभाषारूपेण च प्रतिष्ठिता आसीत्। संस्कृतभाषायाः प्राच्यस्वरूपं पुनः सम्प्रतिष्ठेत् तदर्थम् उतरप्रदेशशासनस्य सहयोगेन संपूर्णानन्दसंस्कृत-विश्वविद्यालयेन सुगमविधिना षाण्मासिकं संस्कृतसम्भाषणप्रशिक्षणं (सर्टिफिकेट कोर्स) संकल्पितमस्ति। संस्कृतं कठिनमिति लोकापवादमात्रम् अल्पीयसा कालेन, अल्पश्रमेण च संस्कृतसम्भाषणे दक्षतायै कुशलप्रशिक्षकैः पाठ्यक्रमोऽयं पाठयिष्यते।

# पाठ्यक्रमसंरचना

संस्कृतसम्भाषणशिक्षणपाठ्यक्रमे-

सर्टिफिकेटपाठ्यक्रमः षाण्मासिकः सञ्चालितो भविष्यति । नवतिहोरात्मकः पाठ्यक्रमोऽयं विद्यते, अस्य पाठ्यक्रमस्य चत्वारि प्रश्नपत्राणि, प्रतिप्रश्नपत्रं पूर्णाकाः शतम् (100), उत्तीर्णाङ्काः षट्त्रिंशत् (36) निर्धारिताः सन्ति।

*Six Months*

# प्रथमं प्रश्नपत्रम्

सर्टिफिकेट-संस्कृतसम्भाषणपाठ्यक्रमस्य षाण्मासिकस्य प्रथमे प्रश्नपत्रे सुवन्त-तिङन्तपदपरिज्ञानं,वाक्यनिर्माणश्चेति त्रयः प्रमुखाः पाठ्यविन्दवः वर्तन्ते । प्रशिक्षकाः अध्यापने मुख्यरूपेण लघुसिद्धान्तकौमुद्याः सुवन्त-तिङन्तपदानि पाठयिष्यन्ति । पाठनकाले संस्कृतसंभाषणनिमित्तकं व्याकरणम् पाठनीयम् । सुवन्त-तिङन्तपदानि वचनपुरुपकालविभक्त्यनुगुणं प्रशिक्षणीयानि ।

**प्रथमं प्रश्नपत्रम्** | **पूर्णाङ्काः 100** | **होरात्रयम्**

**पाठनकालांशः**(विंशतिहोरात्मकः)

**विषयः-**

**1.सुबन्तपदपरिज्ञानम् –** — **पञ्चहोरात्मकम्**

अजन्तसुबन्तपदानि — अ-इ-उ-ऋकारान्त पदम् — (प्रतिपदम् एकहोरात्मकम्)

हलन्तसुबन्तपदानि — (एकहोरात्मकम्)

**2.तिङन्तपदपरिज्ञानम् –** — **पञ्चहोरात्मकम्**

लट्-लृट्-लङ्-लोट्-लिङ् लकारेषु तिङन्तपदानां परिज्ञानम् – (प्रति लकारम् एकहोरात्मकम्)

दशगणीयधातवः यथा- (भू,अद, हू,दिवु,षुञ्, तुद, रुधिर्, तनु,डुक्रीञ्, चुर)

**3.वाक्यनिर्माणम् -** — **दशहोरात्मकम्**

(क) सुबन्ततिङन्तपदं संयोज्य संवादात्मकवाक्याभ्यासः । — (प्रति धातु- एकहोरात्मकम्)

यथा –(रामः अध्यापकः भवति, सः ओदनं अत्ति,कः कस्मै जुहोति, सूर्यः दिव्यती, मूर्खः तुदति, बालकः तनोति, वणिक् क्रीणाति प्रभृतयः)|

**संदर्भग्रन्थाः -(धातुरूपावली,शब्दरूपावली,संस्कृतवाक्यसंग्रह-सार्वभौमसंस्कृतप्रचारसंस्थानस्य, लघुसिद्धान्तकौमुदी) ।**

# द्वितीयं प्रश्नपत्रम्

द्वितीये प्रश्नपत्रे प्रत्ययपरिचयः प्रत्यायान्तप्रयोगपरिचयश्च पाठ्यविन्दुरूपेण निर्मितो विद्यते। संस्कृतव्याकरणे प्रत्ययनिमित्तकानि अनेकानि प्रकरणानि सन्ति, किन्तु संस्कृतभाषासंभाषणार्थं स्त्री-कृत्-तद्धितप्रत्ययाः उपयोगिनः वर्तन्ते , तेषां प्रशिक्षकैः वाक्ये परिज्ञानं कारणीयम् बहुषु कृत्प्रत्ययेषु वाच्यपरिवर्तनं विधाय वाक्याभ्यासः भाषादक्षतायै उत्तमो भवति, प्रशिक्षकैः वाच्यपरिवर्तने प्रत्ययान्तशब्दस्य रूपमपि प्रशिक्षणीयम्।

द्वितीयं प्रश्नपत्रम् | पूर्णाङ्काः(100) | होरात्रयम्

**विषयः-**

**पाठनकालांशः(विंशतिहोरात्मकः)**

**1. प्रत्ययपरिचयः** **(दशहोरात्मकः)**

(क) स्त्रीप्रत्ययपरिचयः (टाप्-डाप्-चाप्-ङीप्-ङीष्)। (प्रति प्रत्ययम्-एकहोरात्मकम्) (पञ्चहोरात्मकः)

(ख)स्त्री-प्रत्ययान्तपदपरिचयः- (प्रति प्रत्ययान्तम्-एकहोरात्मकम्) (पञ्चहोरात्मकः)

**यथा**-(अजा, माया, गौरी, नदी, दण्डिनी, गतिः)

वाक्ये-लिङ्गानुगुणं विशेषणम् पाठनीयम्-यथा-(अयं सूर्यः, इयं सूर्या, इदं फलम्) इति।

**2. कृत्-तद्धित प्रत्ययपरिचयः** **(दशहोरात्मकः)**

(क) कृत्प्रत्ययपरिचयः (तव्यत्-अनीयर्-ण्वुल्-क्तवतु-शतृ-शानच्-ष्ट्रन्-तुमुन्-घञ्-क्त्वा-ल्यप्)। (प्रत्ययद्वयम्-एकहोरात्मकम्)

**वाक्ये**- कृदन्तैः पदैः वाक्यनिर्माणं कृत्वा भाषाभ्यासः।

**यथा**-(गौरी भुक्त्वा गच्छति, अजा गच्छती चरति)।

(ख) तद्धितप्रत्ययपरिचयः (अण्-फ-ढ-ख-छ-घ-तल्-मतुप्-ठक्-वतुप्)। (प्रति प्रत्ययम्-एकहोरात्मकम्)

**वाक्ये**- तद्धितान्तैः पदैः भाषाभ्यासः।

**संदर्भग्रन्थः**-(लघुसिद्धान्तकौमुदी)

# तृतीयं प्रश्नपत्रम्

षाण्मासिकस्य संस्कृतसंभाषणप्रशिक्षणपाठ्यक्रमस्य तृतीये प्रश्नपत्रे क्रियाविभक्ति-समासपरिचयः पाठ्यविन्दुरूपेण निर्धारितो विद्यते | क्रिया विभक्तिरित्यस्यतात्पर्यम् कारकविभक्तिः | वाक्ये अर्थबोधाय विभक्ति समास परिज्ञानं महत्सहायकम् विद्यते |

| तृतीयं प्रश्नपत्रम् | पूर्णाङ्काः(100) | होरात्रयम् |
|---|---|---|
| **विषयः-** | | **पाठनकालांशः(विंशतिहोरात्मकः)** |
| **1. क्रियाविभक्तिः-** | | **(दशहोरात्मिका)** |
| (क) प्रथमाविभक्तितः सप्तमीविभक्तिपर्यन्तम् | (प्रति विभक्ति-एकहोरात्मिका) | (सप्तहोरात्मकम्) |
| (ख) उपपदविभक्तिः | | (त्रिहोरात्मिका) |
| **2. समासपरिचयः** | | **(दशहोरात्मकः)** |
| (क) अव्ययीभाव, तत्पुरुषसमासपदैः वाक्यनिर्माणम् | (प्रति समासं-होराद्वयम्) | (पञ्चहोरात्मकम्) |
| (ख) बहुव्रीहि-द्वन्द्वसं,समासपदैः वाक्यनिर्माणम् | (प्रति समासं-होराद्वयम्) | (पञ्चहोरात्मकम्) |

**संदर्भग्रन्थः-(लघुसिद्धान्तकौमुदी)**

# चतुर्थं प्रश्नपत्रम्

वाक्यनिर्माणाय चतुर्थे प्रश्नपत्रे विशेष्यविशेषणपरिचयः अव्यय-संख्यावाचक-शब्दप्रयोगपरिज्ञानं सूक्ति-श्लोक-कथा-नीतिपद्यानि च पाठ्यविन्दवः वर्तन्ते | वाक्ये विशेष्यविशेषणपरिज्ञानं महत्त्वपूर्णं विद्यते | विशेष्यानुगुणं विशेषणस्य लिङ्गवचनं पाठ्यविन्दुरीत्या प्रशिक्षकैः छात्राः पाठनीयाः | संस्कृतसंभाषणकौशलाय सूक्ति-श्लोक-कथा-नीतिपद्यानि प्रशिक्षकैः संकलनं कृत्वा अध्यापनीयानि |

## चतुर्थं प्रश्नपत्रम् पूर्णाङ्काः(100) होरात्रयम्

**विषयः-** **पाठनकालांशः(त्रिंशत्होरात्मकः)**

1. विशेष्यविशेषणपरिचयः (यथा-इयं सीता, अयं अध्यापकः, रक्तं, वस्त्रम्) (पञ्चहोरात्मकः)
2. अव्यय-संख्यावाचक-शब्दप्रयोगपरिचयः (दशहोरात्मकः)
3. सूक्ति-श्लोक-कथा-नीतिपद्यानि (दशहोरात्मकः)
4. वाक्यनिर्माणाभ्यासः (पञ्चहोरात्मकः)

सब्दर्भग्रन्थाः- (धातुरूपावली,शब्दरूपावली, संस्कृतवाक्यसंग्रह,चाणक्यनीतिः, पञ्चतन्त्रम्) |

# धन्यवादाः वितीर्यन्ते